Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८०२ - घ

Title मलमास निर्णयः

Author

Extent ६ Age

Subject धर्मशास्त्रम् · सम्पूर्णम्

नं० ८६२–घ

मलमासनिर्णयः (धर्मशास्त्रम्)

पत्राणि ६ (संपूर्णम्)

नं० ८७२–घ

अथ मलमासः। अयं च कालाधिक्यात् मलत्वेन व्यवह्रियते यथोक्तं गृह्यपरिशिष्टे
मलं वदन्ति कालस्य मासं कालविदोऽधिकमिति स द्विधा अधिमासक्षयमासभेदात् त-
त्राद्यमाह भट्टगुरुः एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् हव्यकव्यक्रियाहन्ता स
ज्ञेयो ह्यधिमासक इति अथ क्षयागमनकाल उक्तः सिद्धान्ते द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः
षोडशभिस्तथा घटिकानां चतुष्केण पतति ह्यधिमासक इति इदं च वचनं ज्योतिः-
शास्त्रप्रसिद्धमध्यममानाभिप्रायं न तु स्फुटमानाभिप्रायं तस्मात् कर्मानुष्ठानोपयुक्तं यत्स्फुट-
मानं तन्मानाभिप्रायकमुक्तं गृह्ये उक्तं मलमासः विज्ञेयो मासे त्रिंशत्तमे भवेदिति
तद्वेदेतस्मार्तैरप्युक्तं परं त्वेकोनत्रिंशत्प्रभृतीनां मासानां मलमासत्वसंभवात् त्रिं-
शत्तमपदं तत्क्रतेषामप्युपलक्षणमिति स्ववधेयं पोषातिरिक्तानां सर्वेषामेव मासाना-
मधिमासत्वसंभव उक्तो विशुद्धधर्मोत्तरे दशानां फाल्गुनादीनां प्रायो मासानामस्य च
कश्चित् नपुंसकत्वं भवतीति व्याख्यानविनिश्चयपर इति नपुंसकत्वं अधिमासत्वं
असंक्रान्तो यदा मासः कदाचित्तिथिवृद्धितः कालान्तरात् समायाति स नपुंसक उच्य-
ते इति ज्योतिःशास्त्रोक्तसारात् द्विनीमासस्य लक्षणतः राशिद्वयं यत्र मासे संक्रमेत् दिवा-
करः क्षयाधिमासो भवेदेव मलमासस्तु केवलमिति ज्योतिःसिद्धान्तेऽप्युक्तं असंक्रान्तिमासोऽधि

१ मासः स्फुटः स्याद्विसंक्रान्तिमासः क्षयाख्यः कदाचित् क्षयः कार्त्तिकादित्रये नान्यतः
स्यात्तदा वर्षमध्येऽधिमासद्वयं चेति कार्त्तिकमार्गशीर्षपौषाख्यमासत्रये क्षयमासो
भवति न तु माघादिष्वथ तदा तस्मिन्नेव वर्षेऽन्यदप्यधिमासद्वयं भवतीति
द्विसंक्रान्तिः क्षयमासः कदाचिद्भवतीति न तु पूर्वोक्ताधिमासवत् ततः पुनरेतद्वर्षैः
अस्याप्यागमनकालः सिद्धान्तशिरोमणावुक्तः गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले ति
थीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं कुवेदेन्दुवर्षैः क्व
चिद्गोकुभिश्चेति अस्यार्थः चतुःसप्तत्यधिकनवशत ९७४ वर्षपरिमिते शाके क्व
चिद्गतः क्वचित्तु पञ्चदशाधिकशतयुक्तसहस्र ११०५ वर्षपरिमिते भविष्यति क्वचित्तु
षट्पंचाशदधिकशतद्वयोपेतसहस्रः १२५६ वर्षपरिमिते क्वचित्तु अष्टसप्तत्य
धिकशतत्रयोपेतसहस्र १३७८ वर्षपरिमिते क्वचित्तु एकचत्वारिंशदधिकशत
१४१ वर्षपरिमिते क्वचित्तु एकोनविंशति १९ वर्षपरिमिते इति अस्यैव क्षयमासस्य अथ
ज्योतिर्विदां संहस्पतिनामक व्यवहारः इति मलमासस्वरूपनिरूपणं मलमासस्य
कृत्यं हेमाद्रौ पाद्मे अधिमासे तु संप्राप्ते [illegible] युतानि च
त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने सान्यानि तु [illegible] अधिमासे त्वपात्रम्॥

अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्सुरान्‌ देवताः उद्दिश्य अपूपदानेन पृथ्वीदानफलं लभेत्‌ त्रयस्त्रिं
शदपूपान्‌ कांस्यपात्रे निधाय च सघृतं सहिरण्यं च ब्राह्मणाय प्रतिवेदयेत्‌ तत्र मंत्रः वि
ष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेन मम पापं व्यपोहतु ॥
नारायण जगद्बीज भास्कर प्रतिरूपक व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय य
स्य हस्ते गदा चक्रं गरुडो यस्य वाहनं शंखः करतले यस्य स मे विष्णुः प्रसीदतु क
लाकाष्ठादिरूपेण निमेषघटिकादिना यो वंचयति भूतानि तस्मै कालात्मने
नमः कुरुक्षेत्रमयं देशः कालः पर्व द्विजो हरिः पृथ्वीसममिमं दानं गृहाण पुरु
षोत्तम मलानां च विशुद्ध्यर्थं पापप्रशमनाय च पुत्रपौत्रादिवृद्ध्यर्थं तव दास्या
मि भास्कर मंत्रेणानेन यो दद्यात्‌ त्रयस्त्रिंशदपूपकान्‌ प्राप्नोति विपुलां लक्ष्मीं पुत्र
पौत्रादिसंपदः इति ॥ त्रयस्त्रिंशद्देवताः काण्वशाखायां बृहदारण्यके पंचमप्रपाठ
के नवमब्राह्मणे शाकल्यप्रश्ने याज्ञवल्क्येनोक्ताः त्रयस्त्रिंशत्त्वेव देवा इति कतमे त्र
यस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजा
पतिश्च त्रयस्त्रिंशाविति इति मलमासकृत्यं अथात्र देशकालौ संकीर्त्य विपुल
लक्ष्मीपुत्रपौत्रादिसंपदः पृथिवीदानफलप्राप्तये सकलमलविशुद्धिद्वारा त्रय

२

हिरण्यदाद्देवताप्रीतये त्रयस्त्रिंशदपूपान् ॥ सहिरण्यान्संछन्नान्कांस्यपात्रविशिष्टान्
ब्राह्मणाय संप्रददे इति संकल्प्य ब्राह्मणं संपूज्य तस्मै सापूपं पात्रं पूर्वोक्तमंत्रेण द
द्यादिति तत्प्रयोगः ॥ अथ मलमासे विशेषः मेषादिमिथुनांतेषु यर्थि द्वयं भवेत्
अब्दांतरे तदा चापं मिथुनार्के हरिः स्वपेत् कर्कटादित्रिके चापि यदा दर्शद्वयं भवे
त् अब्दांतरे तदा चापं कर्कटार्के हरिः स्वपेत् अथ मलमासे कर्तव्यानि काठकात्र
द्वैमले नन्यगतिं कुर्यात् द्वितीयां नैमित्तिकीं क्रियामिति नित्यां संध्यावंदनादिकां
तथान्यत् सपरिशिष्टे अथ षट्कारहोमाग्निहोत्रोपासनवैश्वदेवादयः पर्वद
र्श सोमासे पार्वणस्थालीपाकश्च एते मासकरसौघ्रत्ववायस्ते नित्यत्वाद
नन्यगतिकत्वाच्च मलमासेपि कर्तव्या तथा नैमित्तिकी ग्रहणस्नानादिकां तदाह यमः
चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं कार्याणि मलमासेपि नित्यं नैमित्तिकं तथेति
तथा सप्तंतरे श्राद्धं जातकनामादि ये च संस्काराः संभवतः मलिम्लुचेपि कर्तव्याः का
म्यां इष्टीश्च वर्जयेत् इति श्राद्धं ॥ जातकर्मादि संवेधिशुद्ध श्राद्धं जातकर्मादि नामकरणं चूडा
मित्यादि सत्यतरसंभवात् संस्काराः गर्भाधानादयः चौलांतः सर्वे वर्जिताः मलेपि
कार्याः ॥ गर्भाधानं पुंसवनं चौलविधितः प्राप्तित्यादि मलेप्याचारे दिवसत्वयः सद्व्रतात्

अथ षट्कारहोमाश्च पर्वणां यथागतावश्य
मलमासे तु कर्तव्यं कामनावर्जितं हि

मोक्षव्रतादयः॥ यमः॥ गर्भे वार्द्धुषिके भृत्ये श्राद्धकर्मणि मासिके सपिण्डीकरणे
नित्ये नाधिमासं विवर्जयेत्। तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः। जातक
र्म्म तथा कर्माणि नवश्राद्धं तथैव च। मघात्रयोदशी श्राद्धं श्राद्धान्यपि च षोडशेति मा
सिकं श्राद्धकर्म नित्यामावास्याश्राद्धं एवं दर्शश्राद्धमहरहः श्राद्धं दाने च प्रतिवास
रं। गोभूतिलहिरण्यानां मासेपिस्यान्नाहि लङ्घचेति मात्स्ये। काम्यं नैव बु का
दाचेनेति वृद्धमासाणत्वाद्ध नित्यनित्यदानोहोमो त्रोपासनहोमः। आन्त्यकर्मा
शौचदनादीनि नवश्राद्धं प्रथमादिदिवसागतं निधनादिस्यानीयं षोडश
श्राद्धं षोडशश्राद्धानि एकादशाहादिदिवसगतानि मरीचिः। रोगे चालभ्ययोगे
च सीमन्ते पुंसवने पि च यद्ददाति समुद्दिश्य पूर्वं त्रापि न दुष्यतीति। अलभ्ययोगः
पद्मकादिः कौथुमीः अप्रदत्तं तु यद्देयं दानं वापि प्रतिसंचितं संवत्सरे विवृद्धे
पि प्रतिमासं च मासकमिति गर्गस्मृतिः। एकोद्दिष्टं तु यत्कुर्यात् न न्निमित्तकं तु चान्ते
तत्कार्यं पूर्वमासे च कालाधिक्ये च धर्मतः इति मरीचिः। प्रतिमासं मृताहे यत् श्रा
द्धं च प्रतिवत्सरं मन्वादौ च युगादौ च मासयोरुभयोरपीति श्रत्र पूर्वमासमृता

२
3
स्य संवत्सर श्राद्धं प्रथमाब्दिकमेव श्राद्धं आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत
मलिम्लुचे स्यापि नयमान्नुसारात् द्वितीयाब्दिकं तु न वर्षे तु यच्छ्राद्धं मासानापि
त्रयोदशेतेहनि मलमासे न कर्त्तव्यं व्यासवचनेऽपि तथेति सत्यव्रतोक्तेः मल
मासमृतस्य तु यदि स एव मलमासस्तदा तत्रापि श्राद्धं कुर्यात् मलमा
स मृतानां तु श्राद्धं यत्प्रतिवासरं मलमासेऽपि कर्त्तव्यं नान्यवर्षोक्तं कथं
चनेति पैठीनसिस्मरणात् तथा वायवीये गयायां सर्वकालेषु पिण्डं दद्याद्विच
क्षणः अधिमासे यत्तद्दिने अस्ते च गुरुशुक्रयोः नत्यक्तव्यं गयाश्राद्धं सिंहस्थे
च बृहस्पतौ इति मलमासे कर्त्तव्यानि अयनविहितानि काठकगृह्ये सोमया
गादिकर्माशिरां नित्यान्यपि मलिम्लुचे परोज्याग्रयणाधानचातुर्मास्यादिका
न्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् स्पष्टमासविशेषाख्याविहि
तं वर्जयेन्मले इति यत्तु नित्यनैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे इत्यादि
वचने नित्यान्यपि कर्त्तव्यानीत्युक्तं तदन्यतिकर्मविषये सोमयागादीनि तु

सान्तिकानि वसंतादौ विहितानां तेषां शुद्धमासेनुष्ठानसंभवात् एवं वैश्वानरं
द्वादशकपालं पुरोडाशं निर्वपेत् पुत्रे जाते इत्यादिश्रुतिविहितानां नैमित्तिकानाम
पि जातेष्ट्यादीनां सगतिकत्वेन मलमासे निषेध इति चेद्यं ननु पुत्रजननानन्तर्यं
बाधितं भवतीति चेत् किं ततः नहि मलमासे भावे पुत्रजननाव्यवहितकाले सा
नुष्ठीयते श्रुतिवाक्यरूपांगाभावे गुणलोपार्थमासो वोत्तरं तस्मान्नानुष्ठानमिति चेत्तु
र्येष्टिकृतिरूपत्वात् ननु एवमाग्रयणेष्टेः पर्वचाग्रयणं तथेति गृह्यपरिशिष्टेक
थंकर्तव्यतोक्तेति चेत् पत्युरातिरात्रेषोडशिनं गृह्णातिनातिरात्रेषोडशिनं गृ
ह्णातीति वद्विहितप्रतिषिद्धत्वेन वैकल्पिकत्वं तस्याः परं तु तत्र विकल्पस्यैवं व्यव
स्थाबोध्या दुर्भिक्षरोगपुराजनधान्यालाभाद्यजीवनानि वह्निवशादसंपत्तौस
त्यां नवान्नभक्षणाधिकारार्थमावश्यकत्वान्मलमासेप्याग्रयणस्यकर्तव्यतोक्तिः
निषेधस्तु नाम्यद्विषयइति यत्तु कालादर्शकारेणामहालययुगादिपित्र्यादिस्व

८ येन महालयस्य मलमासे कर्तव्यत्वमुक्तं तद्विरुद्धं महालयाष्टके त्यादिष्वित्यादि इ
वैदाहृत काठकगृह्य विरोधात् तद्विष्ण्वाद्युक्त तथा सोम मन्माद्यैयं महालयं राज्या
भिषेकं काम्यं च न कुर्यात् प्रानुले द्वितीय इति ? वचो विरोधाच्च यदपि कालादर्श
यं थं व्याचक्षाणो माधवाचार्यैरुक्तं महा लय पदेन तीर्थविशेषो मघात्रयोदशी
वा विवक्षणीयेति तदपि ग्रंथव्याख्यानं दुरात्ति महालयेति शब्दे समुदायस्या
परपदस्याद्युपव प्रसिद्धत्वेनावयवपरत्वात्तीर्थादिपरताया असामंज
स्यात् अन्यथा रथ्याकाराधिकरणविरोधः अयलदया तीर्थादिपरत्वमिचेत् अर्थिल
दृष्टोवद्योषः यदुक्तं मीमांसाभाष्ये धीते शब्दप्रयोगे किमित्यवाचकं प्रयोदा
मह इति अथोपाकर्मादि इत्यादि यदाद्युत्सर्जनं उपाकर्म तयोस्तां काम्यमुत्स
व मष्टकाः मासवृद्धेपरांकायौ इत्यादि हरीनोक्तः छंदोगानां तु नायं निषेधः
तेषां सिंहार्कैपवोपाकर्मादि विधानात् अत एव वर्ष्यंसंगः दशाहराहुनोत्कर्षम्य

८

न्मर्केपि युगादिषु उपाकर्ममहाष्टम्यो ह्यत्तद्दिष्टं त्वबाधितमितीति केचिद्वत् श्रावणं
श्रावणं कर्म यथाविधि समाचरेत् उपाकर्म न कर्तव्यं कर्कटस्थे दिवाकरे इतिनि
गमोक्तेः सामगानामपि कर्कटे एवोपाकर्मविधाने नोत्कर्षानापत्तेः तस्मा
त्सर्वेषामुत्कर्षमाह कात्यायनः उत्कर्षः कालवृद्धौ स्यादुपाकर्मणीति ज्योतिः
पराशरोपि उपाकर्म तथोत्सर्गं प्रसवाहेत्सवाष्टकाः मासवृद्धौ पराः कार्या वर्ज
यित्वा तु पैतृकं इति उत्कर्षनिषेधस्तु निर्मूलः यद्वोपाकर्ममहापराह्णार्थयोत्कर्ष
स्तथाद्यपराह्णरात्सूत्कर्षेत्तानौचित्येवं व्याख्येयमित्यन्ये वस्तुतस्तु श्रावणं श्राव
णं कर्म [illegible]दि निगमोक्तेः कर्कस्थे सूर्ये उपाकर्मविधिर्देशविशेषे सामगान्यहलेव
यु[illegible]: [illegible]ह प्रयोगपारिजाते गृह्यस्मृतिः नर्मदोत्तरभागे तु कर्तव्यं सिंहयुते के॥
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति हेमाद्र्यादयोप्येवमेवाभिप्रयन्ति काम्य

५ तिजा वालिः तिथिन तत्र व्रतवारो सकाम्यं नैव कर्यं चैवे तिमर्पयं च॥

कर्मनिषेधं आरंभसमाप्तिविषयः अस्पष्टीनामतेमासान्तनैष्ठमममसंमतः व्रतानां

5 चैवप्रमाणानामारंभसमापनमितिस्मृत्यंतरानुसारात् आवश्यकंतुकाम्यं

रहितोद्योगव्याद्रिमलमासेप्यारंभणीयं एतेनेष्ट्यादिसर्वेसर्वकाम्यंचमलमा

सेविवर्जयेदित्यादिनिषेधा अपि व्याख्याताः यत्तुप्रवृत्तंमलमासात्प्राक्का

म्यकर्मसमापितं आगतेमलमासेपितत्समाप्तिर्नैवसंशयः इतिकाठकगृह्यं॥

तत्सावनमासप्रवृत्तकृच्छ्रादिविषयं अतएवकालादर्शे आरंभेदर्शपूर्णसी

व्याधरोगनिवृत्त्यस्यचादिमं प्रतिष्ठांचैवकुर्यां मघामलमासेविवर्जयेदिति तथा वृद्धमनुः

देवव्रतवृषोत्सर्गचूडाकरणमेखलाः मांगल्यमभिषेकंचमलमासेविवर्ज

येदिति कुट्टमिः दृष्ट्वाप्यथवा पूर्त्तं तन्नकुर्यान्मलिम्लुचे स्मृत्यंतरे वापी

कूपतडागादिप्रतिष्ठायज्ञकर्मचनकुर्यान्मलमासेचमहादानव्रतानिचेति॥

मद्द्वादानास्ति तुलाप्रवेशषादौति ज्योतिःशास्त्रे असंक्रांतप्रकरणे तत्रदत्तमदत्तं वा कृतं न कृतमेव वास्त
जन्मप्रभृतिप्रजन्तंस्यानोपवासः कृतोयवेतत् नयाज्ञा न विवाहस्तु न च वास्तु निवेशनं न प्रतिष्ठां
चदेवानां प्रासादस्थैर्यं ... हं तां नहि रथांचनवासांसि कारयेदिति निश्चय इति दिवोदासीये
यात्रोक्तं च देवादि दशपर्यं दिव्यमेव च मलमासे न कुर्वीत व्यासस्य वचनं यथेति ज्योतिःप्रकाश
रः रविस्तु लंघितो मासश्चांद्रः ख्यातो मलिम्लुचः तत्र यद्विहितं कर्म उत्तरे मासि कारयेदिति
एष एव च क्षयमासे विनिर्णयः रविसंक्रमहीने यो वर्ज्यो वर्ज्यविधिः स्मृतः तत्र च द्विसंक्रांतेम
लमासे प्रवृद्धीरितं तत्र हि काठकगृह्योक्तेः क्षयमास स्मृतौ तिथ्येः पूर्वोत्तरार्द्धे स्यात् पूर्वोत्तरयोर्मा
6 सयोरर्थवत्स्यात् तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयार्द्धे तदुत्तरः ॥ मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्य
गाविति स्मृतेः मलमास तिथिक्रमस्तत्राप्यविनिर्दिशति बृहस्पतिः बाले वा यदि वा वृद्धे शुक्रे वा
लंगते गुरौ मलमास इवैतानि वर्जयेद्देवदर्शनमिति इति मलमासनिर्णयः ॥२॥५५ ≡ ॥ ५५॥

६